वर्षम्-२४ अङ्कः-१
जुलाई तः सितम्बर २०२५ पर्यन्तम्
( आषाढ-शुक्ल-षष्ठी-तः आश्विन-शुक्ल-अष्टमी-पर्यन्तम् )
( वैक्रमाब्दः-२०८२ )

RNI No.
DELSAN/2002/8921
ISSN : 2278-8360

# संस्कृत-मञ्जरी

विद्वत्-समीक्षित एवं सन्दर्भित त्रैमासिकी शोध पत्रिका

A Peer- Reviewed & Refereed Quarterly Research Journal

दिल्ली संस्कृत अकादमी
दिल्ली सर्वकारः

सम्पादकः
शैलेन्द्रकुमारसिंहः
सचिवः

## सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

# "संस्कृत-चन्द्रिका"

नैतिक-मूल्यों के साथ-साथ
सम्पूर्ण देश के वरिष्ठ-बाल-साहित्यकारों तथा नवोदित प्रतिभाओं
की लेखनी की संयुक्त प्रस्तुति

# "संस्कृत-चन्द्रिका"

( आई.एस.एस.एन.-2347-1565 )

**संस्कृत भाषा के प्रचार-प्रसार हेतु प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की मासिक बाल पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।**

**मूल्यः- एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. २५०/- मात्र**

**सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका**

# "संस्कृत-चन्द्रिका"

**के स्थायी अध्येता बनें।**

**आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट दिल्ली संस्कृत अकादमी के नाम से अथवा अकादमी के बैंक खाते सं. 01701040002562285, आई.एफ.सी. कोड- IBKL 0000170 (IDBI BANK- Preet Vihar) में ऑन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।**

पत्र व्यवहार का पता -

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**
**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**
**दूरभाष सं.- ०११-२०९२०३६३**

अन्ताराष्ट्रिया त्रैमासिकी शोध-पत्रिका

आई०एस०एस०एन०-2278-8360

# संस्कृत-मञ्जरी

वर्षम्-२३ अङ्कः-४/२०२५

( जुलाई-तः सितम्बरः २०२५ पर्यन्तम् )

( आषाढ-शुक्ल-षष्ठी-तः आश्विन-शुक्ल-अष्टमी-पर्यन्तम् )

( वैक्रमाब्दः- २०८२ )

**प्रधान-संरक्षकः अध्यक्षश्च**
**माननीयः श्री कपिल मिश्रा**
मन्त्री, कला-संस्कृति-भाषा-विभागश्च
दिल्लीसर्वकारः

**प्रधान-सम्पादकः**
**डॉ. रश्मि सिंहः**
**सचिवः**
कला-संस्कृति-भाषा-विभागश्च
दिल्ली-सर्वकारः

**सम्पादकः**
**शैलेन्द्रकुमारसिंहः**
**सचिवः**
दिल्ली-संस्कृत-अकादमी,
दिल्ली-सर्वकारः

**सहायक-सम्पादकः**
**प्रद्युम्नचन्द्रः**

**परामर्शकाः**

१. **प्रो० के.बी.सुब्बारायडु, पूर्वकुलपतिः**
राष्ट्रिय-संस्कृत-संस्थानम् केन्द्रीय-विश्वविद्यालयः, नवदेहली

२. **प्रो० देवीप्रसादत्रिपाठी, पूर्वकुलपतिः**
उत्तराखण्ड-संस्कृत-विश्वविद्यालयः, हरिद्वारम्, उत्तराखण्डः

३. **प्रो० रमेशभारद्वाजः, कुलपतिः**
महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयः, मुंदड़ी, कैथलः, हरियाणाप्रदेशः

४. **प्रो० शिवशङ्करमिश्रः, अध्यक्षः**
कुलगुरुः, महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालयः, उज्जैनम्, मध्यप्रदेशः

५. **प्रो० रणजित् बेहेरा, आचार्यः**
कला-संकायः, संस्कृत-विभागः, दिल्ली-विश्वविद्यालयः, देहली

६. **डॉ. धनञ्जयमणित्रिपाठी, सहायक-आचार्यः**
संस्कृत-विभागः, जामिया मिल्लिया केन्द्रीय-विश्वविद्यालयः, नवदेहली

**सम्पर्कः**
सचिवः
दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः
प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-११०००५
दूरभाषः - ०११-२०९२०३६२
अणुसङ्केतः - sanskritpatrika.dsa@gmail.com
**वेब साईट** - https://sanskritacademy.delhi.gov.in

**ग्राहकतायाः कृते**
प्रत्यङ्कं मूल्यम्- पञ्चविंशतिः रूप्यकाणि
वार्षिकशुल्कम् - शतं रूप्यकाणि

# अनुक्रमणिका


| संस्कृतभागः- | | पृष्ठसंख्या |
|---|---|---|
| सम्पादकीयम् | | III |
| १. | श्रीमद्भगवद्गीतायां दैव्यासुरीप्रवृत्तीनां संघर्षः- आधुनिकदृष्ट्या विश्लेषणम्<br>-डॉ. परिमलमण्डलः | १ |
| २. | विश्वगुणादर्शचम्प्वाः विश्वतोमुखत्वम्<br>-डॉ. टि. महेन्द्रः | ७ |
| ३. | स्वप्नोऽपि कश्चन आरम्भः<br>-डॉ. आशीषः कुमारः | १४ |
| ४. | न्यायमीमांसाव्याकरणसाहित्यदिशा लक्षणाविमर्शः<br>-अभिषेककुमारशुक्लः | २३ |
| हिन्दीभागः- | | |
| ५. | संस्कृत वाङ्मय में नीतिशास्त्र और मनोविज्ञान<br>-डॉ. भेषराज शर्मा | ३५ |
| ६. | आधुनिक संस्कृत साहित्य का कालण्ड तथा तत्कालीन सामाजिक परिवर्तन-एक दृष्टिक्षेप<br>- प्रो. शुचिता लालचंद दलाल | ४२ |
| ७. | महाकवि कालिदास की कृतियों में शकुन-अपशकुनोल्लेख<br>-डॉ. विशाल भारद्वाज | ४५ |
| ८. | वैदिक परम्परा में ज्योतिशास्त्राधारीत ऋतु-विचार<br>-डॉ. आकाश | ५० |
| ९. | योग ग्रंथों में वर्णित यम-नियम के स्वरूप का समीक्षात्मक अध्ययन-समसामयिक उपयोगिता के विशेष संदर्भ में।<br>-श्री नितिन | ५७ |
| अंग्रेजीभागः- | | |
| १०. | **Moral dimensiaon of kumbha rituals.**<br>Dr. Nilachal Mishra | ६७ |

# सम्पादकीयम्

**अयि सुरभारतीसमुपासकाः सुहृदयाः!**

मानवमनः कर्मणः अपेक्षा परिणामे एवासक्तः वर्तते। यत्किमपि कर्म तेन कृतं तत्सद्फलमेव इच्छति सः। यद्यपि प्रायः मानवचित्ते कृतकर्मफलपरिणामानुभूतिः पूर्वमेव भवति परन्तु यदि परिणामः अनुकूलः नास्ति तदा तत् परिणामं न स्वीकरोति। कार्यं कुर्वन् फलासक्तिः चित्ते भारमेव प्रतिभाति। यदा कर्मफले आसक्तिः नास्ति तदा एव मनुष्यः कर्मबन्धानात् मुक्तः भविष्यति। ततः जन्म-मृत्यु-पाप-पुण्य-भावविहीनः स्याद् इति परं भावः। अत एव श्रीकृष्णेन भगवद्गीतायाम् उक्तं-

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**
**मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि॥**

निवेदयत्ययं जनः यत् उत्तमानां शोधपत्राणां सुसज्जिता दिल्ली-संस्कृत-अकादम्याः 'संस्कृतमञ्जरीति' शोधपत्रिकायाः चतुर्विंशतितमवर्षस्य जुलाई तः सितम्बर २०२५ पर्यन्तं प्रथममंकं सम्पाद्य संस्कृतिसंस्कृतसमाराधनैकव्रतास्तत्र भवतां भवतीनां गीर्वाणवाणीप्रणयिनां सुधियां पाठकानां च करकमलेषु समर्पयन्नतितरामुदमावहामि। अंकेऽस्मिन् प्रकाशितेषु लेखेषु डॉ. परिमलमण्डलस्य आलेखः 'श्रीमद्भगवद्गीतायां दैव्यासुरीप्रवृत्तीनां संघर्षः -- आधुनिकदृष्ट्या विश्लेषणम्', डॉ. टि. महेन्द्रस्य आलेखः 'विश्वगुणादर्शचम्प्वाः विश्वतोमुखत्वम्', हिन्दीप्रभागे डॉ. भेषराजशर्ममहोदयानां आलेखः 'संस्कृत वाङ्मय में नीतिशास्त्र और मनोविज्ञान', प्रो. शुचितालालचंददलाल-महोदयानां आलेखः 'आधुनिक संस्कृत साहित्य का कालखण्ड तथा तत्कालीन सामाजिक परिवर्तन- एक दृष्टिक्षेप' तथा च आंग्लप्रभागे डॉ. नीलाचलमिश्रामहोदयानाम् आलेखः 'Moral Dimensions of Kumbha rituals' विशिष्टाः सन्ति। एतदतिरिक्ताः कतिपयशोधच्छात्राणां विशिष्ट-शोधपत्राः अपि प्रकाशिताः। सर्वे लेखाः जिज्ञासूनां पाठकानां प्रौढानां च कृते अतीवोपयोगिनो भवन्ति तथा च एतैः शोधलेखैः शोधाकार्य्ये सन्नद्धानां शोधाच्छात्राणां मार्गदर्शनं भविष्यतीति नास्ति काऽपि सन्देहः।

आशासे शोधपत्रिकेयं सर्वैः पाठकैः सादरं स्वीकरिष्यते सोत्साहं च पठिष्यत इति।

शकाब्दः १९४७ (भाद्र-कृष्ण-अष्ठमी)
श्रीकृष्णजन्माष्टमी

भावत्कः
**शैलेन्द्रकुमारसिंह**
सचिवः

# श्रीमद्भगवद्गीतायां दैव्यासुरीप्रवृत्तीनां संघर्षः- आधुनिकदृष्ट्या विश्लेषणम्

-डॉ. परिमल मण्डलः

**शोधसारः-**

श्रीमद्भगवद्गीता न केवलमेकः धार्मिकः ग्रन्थोऽस्ति अपितु असौ एकः निगूढाध्यात्मिकसन्देशावहं महाकाव्यमस्ति। यत्र बाह्ययुद्धस्य प्रतीकात्मकरूपेण आन्तरिकं संघर्षं समुद्घाटितमस्ति। गीतायां वर्णितं दैव्यासुरीप्रवृत्तेः संघर्षस्वरूपं आधुनिकेदृष्टिकोणानुसारं तस्य ज्ञानमेव प्रस्तुतशोधस्य मुख्यमुद्देश्यमस्ति। प्रथमाध्यायादारभ्य अष्टादशाध्यायं यावत् गीतायाः नैके श्लोकाः सन्देशमिदं स्पष्टीकुर्वन्ति यत् युद्धोऽयं न केवलं भौतिकम् ऐतिहासिकं वा अपितु मनुष्याणामन्तःकरणस्थानां सत्वरजसोः मध्ये सङ्घर्षः। स्वामी-अडगडानन्द-महात्मागान्धीप्रभृतीनामिव नैके अध्यात्मवादिनः भगवद्गीतां मानसिकसंघर्षरूपेण व्याख्यातवन्तः। येषां मतानुसारं कुरुक्षेत्रं न किमपि भौगोलिकक्षेत्रमासीत् अपितु स्वशरीरं धर्मक्षेत्रमेवास्ति। यत्रात्मा कामक्रोधलोभमोहादिभिः विकारैः सततं युद्धं करोति। षोडशाध्याये विशेषरूपेण दैव्यासुरीगुणानां वर्णनमस्ति। यत्र षड्विंशतिगुणाः मोक्षं प्रति मानवान् प्रेरयति किञ्च षडासुरीगुणाः तान् बन्धनं प्रति अग्रेसारयति। शोधोऽयं गीतायाः युद्धमाध्यमेन आध्यात्मिकसाधनायाः, स्वधर्मप्रतिष्ठायाः, आत्मकल्याणस्य च मार्गं प्रस्तौति।

**कुञ्चीशब्दाः** - दैव्यासुरीप्रवृत्तयः, आत्मिकं संघर्षः, धर्मयुद्धः, कुरुक्षेत्रम्, वर्णव्यवस्था, स्वधर्मः च।

**"अध्यात्मविद्या विद्यानाम्"**[1] इति भगवदुक्त्यनुसारं भारतीयाध्यात्मग्रन्थेषु महाभारतमन्यतमम्। यत्र वेदव्यासेन एकस्य ऐतिहासिकघटनाक्रमस्य प्रतीकात्मकं स्वरूपमभितं संस्थाप्य निगूढाध्यात्मिकं सन्देशं प्रकाशितम्। महाभारतग्रन्थस्यास्य भीष्मपर्वान्तर्गतः संक्षिप्तोऽपि महत्त्वपूर्णमंशः श्रीमद्भगवद्गीताग्रन्थः प्रस्तुतोऽभूत्। परन्तु परितापस्य विषयोऽयं यत् अस्माकं समाजस्य बहवः जना अद्यापि आध्यात्मिकग्रन्थमिमं केवलमात्रमैतिहासिक-युद्धकथारूपेण स्वीकुर्वन्ति। यदि महाभारतयुद्धं केवलमात्रमेकमैतिहासिकयुद्धरूपेण मान्यते तर्हि असौ भारतीयेतिहासस्य सर्वाधिकः रक्तरञ्जितयुद्धरूपेण ख्यातः भवेत्। यतोहि अत्र असंख्यनरसंहारस्य घटना वर्णिता जाता। महाभारतयुद्धे सम्मिलितानां सेनानामाकलनेनानुमीयते यत् यदि युद्धोऽयम् ऐतिहासिकरूपेण संघटितः तर्हि अस्य भयावहता अकल्पनीया जाता। युद्धभूमौ कौरवाणां एकादशाक्षौहिणी सैन्याः, पाण्डवानां सप्ताक्षौहिणी सैन्याश्च समुपस्थिताः जाताः। प्रसङ्गेऽस्मिन् गोस्वामी-तुलसीदासकृतरामचरितमानसे अक्षौहिणी-सेनायाः सूक्ष्मगणनायाः वर्णनं समुपलब्धम्।[2] तत्रोल्लिखितमस्ति यत्-एकाक्षौहिणी पत्ति-सेनापति- सेनामुख-गुल्म-गण-वाहिनी-पूतना-चमू-अनिकीनिनां समुदायः। यथा एकस्मिन् पत्तौ एकः रथः, एकः गजः, अश्वत्रयः, पञ्चपदातिकाः सैन्याः चासन्। तथा एकस्मिन् सेनामुखे त्रयः रथाः, त्रयः गजाः, नवाश्वाः, पञ्चदशसैनिकाः च भवन्ति। एकस्मिन् गुल्मेऽपि नवरथाः नवहस्तिनः , सप्तविंशतिः अश्वाः, चतुःपञ्चाशत् पदातिकाः सैनिकाश्च। एवञ्च एकस्मिन् गणे सप्तविंशतिः रथाः, सप्तविंशति गजाः, एकाशीतिः अश्वाः पुनश्च पञ्चत्रिंशदधिकमेकशतं

---

१. श्रीमद्भगवदगीता १०/३२

२. गीता परिचय, श्रीरामदयाल मजुमदार, पृष्ठ-१२

सैनिकाः। एकस्यां वाहिन्यामपि एकाशीतिः रथाः, एकाशीतिः गजाः, २४३ अश्वाः पुनश्च (४०५) पञ्चाधिकं चतुःशतं पदातिक-सैनिकाः। एवमपि एकस्यां पूतनायां २४३ रथाः, २४३ गजाः, ७२९ अश्वाः पुनश्च १२१५ पदातिकाः सैनिकाः। एकस्मिन् चमौ ७२९ रथाः, ७२९ गजाः, २१८७ अश्वाः पुनश्च ३६४५ पदातिक-सैनिकाः। एकस्याम् अनीकिन्यां २१८७ रथाः, २१८७ गजाः, ६५६१ अश्वाः पुनश्च १०९३५ पदातिक-सैनिकाः सम्मिलिताः जाताः। अस्य गणनानुसारं एकाक्षौहिणी सेनायां २१८७० रथाः, २१८७० गजाः, ६५६१० अश्वाः पुनश्च १०९३५० पदातिकाः सैनिकाः आसन्। यत्र कौरवाणां समुदायसंख्या २४०५७० रथाः, २४०५७० गजाः, ७२१७१० घोटकाः किञ्च १२०२८५० पदातिकाः सैनिकाः जाताः। एवमपि पाण्डवानां निकटे सप्ताक्षौहिणी सेनाः आसन्। यत्र १५३०९० रथाः, १५३०९० हस्तिनः, ४५९२७० घोटकाः किञ्च ७६५४५० पदातिकाः सैनिकाः सम्मिलिताः जाताः। यदि उभयपक्षस्य सेनानां सम्मिश्रणं क्रियते तदा कुरुक्षेत्रस्य युद्धप्राङ्गणे समुदायः ३९३६६० रथाः, ६९२६६० हस्तिनः, ११८०९८० घोटकाः, १९६८३०० पदातिकाः एकत्रिताः जाताः। एतासां विशालसेनानाम् एकस्मिन् स्थाने कुरुक्षेत्रे एकत्रिभूय युद्धः भौतिकदृष्ट्या असम्भवः प्रतीयते। युद्धसमाप्त्यनन्तरं धृतराष्ट्रस्य वचनात् ज्ञायते यत् गान्धार्याः सर्वे पुत्र-पौत्र-पिता-भ्रातरः प्रभृतयः युद्धे मृताः जाताः। केवलमात्रं त्रयः योद्धारः दुर्योधनपक्षात् किञ्च पाण्डवपक्षात् सप्त जीविताः आसन्।[३] अस्मिन् भयानकयुद्धे सम्पूर्णाष्टादशाक्षौहिणी सेना विनष्टा जाता। यदि युद्धोऽयं वास्तवदृष्टया ऐतिहासिकः आसीत् तर्हि एतादृशानां विशालसेनानां विनाशात् भारतवर्षेऽस्मिन् शासनशून्यतायाः सेनाशून्यतायाः वैदेशिकाक्रमणस्य च सम्भावना प्रबला स्यात् इति मन्ये किञ्च अनेन सह व्यापकविघटनस्य विशेषतः महिलानां कुलभ्रष्टादीनमिव समस्यापि स्यात्। किन्तु परवर्ती-भारतीयेतिहासे एतादृशीनां समस्यानां समुल्लेखः नैव जातः, येनैतत् सुस्पष्टं यत् महाभारतस्य युद्धः प्रतीकात्मकस्य आध्यात्मिकस्तरस्य चोपरि सीमाबद्धः आसीत्।

भगवद्गीतायां नैकेषु स्थलेषु युद्धशब्दस्योल्लेखः[४] प्राप्यते। यत्केवलं बाह्यसंघर्षस्य नैव प्रतीकः अपितु आन्तरिकात्मसंघर्षस्य किञ्च साधनामार्गस्यापि द्योतकोऽस्ति। तद्यथा भगवद्गीतायाः द्वितीयाध्यायस्य एकत्रिंशत्तमे श्लोके श्रीकृष्णः अर्जुनं समुपदिशति-

**"स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि।**
**धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥"**[५]

अर्थात् स्वधर्मावलोकनेन भवतः चित्तः विचलितः न भवेत्। यतोहि क्षत्रियस्य कृते धर्मयुद्धात् श्रेष्ठतरमन्यत् किञ्चिदपि कर्म न विद्यते। अत्र 'स्वधर्म' इत्यस्य तात्पर्यं जातिगतमुत्तरदायित्वं नास्ति अपितु व्यक्तेः अन्तर्निहित-स्वभावस्यात्मिक-प्रवृत्तेश्च किञ्च साधनात्मकक्षमता माध्यमेनास्ति। प्रत्येकेषु व्यक्तिविशेषेषु आत्मविकासस्य भिन्नभिन्नयोग्यताऽस्ति, पुनश्च तदनुरूपमस्य कर्तव्यमपि निर्धारितमस्ति।

प्राचीनभारतस्य चिन्तनेषु अस्याध्यात्ममार्गस्य साधनामाधाररूपेण परिभाव्य वर्णव्यवस्थायाः व्याख्यानं क्रियते। यतोहि जन्मना प्रत्येकः मनुष्यः शूद्रः जायते,[६] तत्र प्रारम्भिकावस्थायामसौ केवलमात्रं पालनपोषणयोः सेवायाश्च

३. The Mahabharata-An English Abridgement, page-101-105
४. श्रीमद्भगवदगीता १/२२,२/१८, २/३१, २/३२, २/३७, ११/३४
५. श्रीमद्भगवदगीता २/३१
६. स्कन्दपुराण, नागखण्ड २३९/३१

योग्योऽस्ति। यदा असौ बालः ज्ञानार्जनस्येच्छया गुरुकुलं प्रविशति, तदा तं 'वैश्यः' इत्युच्यते यतोहि असौ तदा अर्जनप्रवृत्त्या प्रेरितोऽस्ति। शिक्षाप्राप्तः सन् यदा इन्द्रियनिग्रहस्यात्मनियन्त्रणस्य च प्रतिज्ञां करोति तदाऽसौ 'क्षत्रियः' भवति। एवञ्च तदैव तस्याध्यात्मिकयुद्धः प्रारब्धः भवति। युद्धोऽयं तस्य समीपे बाह्यशत्रूणां कृते नैवास्ति किञ्च आत्मस्थानां विकाराणां काम-क्रोध-लोभ-मोहादीनां विरुद्धे भवति। यदा साधनया मनसः शमनं, इन्द्रियाणां संयमः, किञ्च अन्तःकरणस्य शुद्धिः जायते, तदाऽसौ 'ब्राह्मण' इति कथयितुं योग्यः जायते। अस्य ब्राह्मणत्वस्य सिद्धेः पश्चात् साधकः ब्रह्मानुभूतेः दशायामग्रेसरति। यत्रात्मनः ब्रह्मणा सह एकाकारः जायते। प्राचीनकाले येयं वर्णव्यवस्था आसीत् तस्याः मूलं एकस्याध्यात्मिकसाधनामार्गमासीत्। यदेव कालान्तरे समाजे भौतिककर्मणः आधारस्योपरि स्वीकृतवान्। पुनरसौ जन्मपरकव्यवस्थारूपेण समाख्याता संजाता। अनेन सेवकं शूद्ररूपेण वणिजं वैश्यरूपेण, योद्धारं क्षत्रियरूपेण एवञ्च पूजादिकं विधातारं ब्राह्मणरूपेण समाजे उच्यन्ते। समधिकैः विद्वद्भिः तथाकथितवृक्षस्यास्य छायाव्यवस्थां दूरीकर्तुम् उद्यतवन्तः किन्तु अस्य जडं विज्ञातुं ते सम्यक्तया न यतन्ते स्म। परिणामस्वरूपं गीतायाः आध्यात्मिकरहस्यमद्यापि अनेकेषां विचारकाणां दृष्टिमार्गं निकषा नायाति। वास्तवदृष्ट्या गीतायां वर्णितस्य धर्मयुद्धस्यास्याशयः बाह्यशस्त्रधारीणां युद्धस्य कृते नैवास्ति अपितु स्वधर्मानुरूपं यथार्थकर्म सम्पादयितुं, आत्मशुद्धये, आत्मसंयमाय, ब्रह्मप्राप्तये च क्षत्रियत्वस्य च यथार्थसाधनं भवति।

गीतायाः द्वितीयाध्याये भगवान् श्रीकृष्णः अर्जुनम् उपदिशति-स्वर्गद्वारमद्य स्वतः उन्मोचितमस्ति। अवसरोऽयं न प्रत्येकेषां सौभाग्यशालीनां क्षत्रियाणां कृते एव मिलति।[७] यदि त्वं युद्धादस्मात् विमुखः भविष्यसि, तर्हि न केवलं स्वधर्मं कीर्तिं च हारयिष्यसि अपितु पापभागपि भविष्यसि।[८] तव निन्दा एव स्यात्, यदेकस्य माननीयपुरुषस्य कृते मरणादपि अतिरिच्यते।[९] अनेन सर्वेऽपि महारथिनः एव कथयिष्यन्ति यत् अर्जुनः भयेन युद्धात् पलायितः। येषां जनानां दृष्ट्या त्वमद्यादरणीयोऽसि सोऽपि तव योग्यतां निन्दिष्यति किञ्च जनाः तव पराक्रमस्य अपि उपेक्षां कृत्वा अवाच्यवादांश्च कथयिष्यन्ति। अपमानमेतद् यस्य कस्यापि वीरस्य कृते अतीव दुःखदायकं स्यात्। यदि त्वं युद्धे वीरगतिं प्राप्स्यसि तर्हि स्वर्गं गमिष्यसि, किञ्च यदि त्वं विजयी भविष्यसि तर्हि इह पृथिव्यां राज्यभोगं करिष्यसि । अतः हे अर्जुन! युद्धाय कृतनिश्चयः भव। यदि श्लोकमिमं केवलं बाह्यरूपेण पश्यामः, तर्हि प्रतीयते यत् भगवान् श्रीकृष्णः अर्जुनं हिंसायुद्धाय प्रेरयति। अतः गीतायाः केचन व्याख्याकाराः अस्य वचनस्य व्याख्याकरणात् गीतायाः ऐतिहासिकपृष्ठभूमिं स्वीकृत्य तां ऐतिहासिकघटनाक्रमस्य रूपं बोधयितुं उद्यतवन्तः। किन्तु अन्ये केचनध्यात्मवा-दीविचारकाः गीताम् आन्तरिकस्य मानसिकयुद्धस्य वा प्रतीकरूपेण मान्यन्ते। महात्मागान्धी-स्वामी-अडगडानन्द-रामकृष्णदेवशर्माप्रभृतयः यथा विद्वांसः भगवद्गीताम् एकमाध्यात्मिकग्रन्थरूपेण व्याख्यातवन्तः। गान्धीनः मतानुसारं कुरुक्षेत्रं न काऽपि भौगलिकभूमिः अपितु अस्माकं स्वयं शरीरमस्ति, यत्र दैव्यासुरीप्रवृतेः मध्ये निरन्तरं संघर्षः प्रचलति। असौ गीतां माता इत्युक्त्वा संबोधितवान्, यतोहि जीवनेऽस्मिन् प्रतिसंघर्षेषु अस्माकं सधैर्य्यं दृढतया सह जीवितुं शिक्षां प्रददाति। अस्मात् गीतायाः त्रयोदशाध्याये सुस्पष्टमुच्यते-

**'इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते, एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः।'** [१०]

७. श्रीमद्भगवदगीता २/३२

८. श्रीमद्भगवदगीता २/३३

९. श्रीमद्भगवदगीता २/३६

१०. श्रीमद्भगवदगीता १३/२

अर्थात् शरीरमिदं क्षेत्रमित्युच्यते एवमपि एतत् यः जानाति तं क्षेत्रज्ञ इत्युच्यते। अनयोः क्षेत्रक्षेत्रज्ञयोः व्याख्यां विधाय स्वामी अडगडानन्दः कथयति यत्- धर्मक्षेत्रं कुरुक्षेत्रञ्च न काऽपि भौगोलिकभूमिरस्ति अपितु एतदेव मनुष्यस्य शरीरमस्ति। एतत्तु एकस्य शरीरस्य मध्ये अन्तःकरणस्य प्रवृत्तिद्वयं दैवी आसुरी चेति निरन्तरं सक्रिये स्तः। यदा आसुरीप्रवृत्तेः प्रधानता अनुभूयते, तदा शरीरमिदं कुरुक्षेत्रं जायते। किञ्च दैवीगुणस्य विकासेन शरीरमिदं धर्मक्षेत्रेण परिणम्यते परिवर्तते वा। अतः गीतायां वर्णितः युद्धः वास्तविकदृष्ट्या आन्तरिकसंघर्ष इत्युच्यते, यमिमं मनुष्यः आत्मनः मध्ये स्थितस्य नकारात्मकप्रवृत्या सम्पादयति। युद्धोऽयं न बाह्यम् अपितु आध्यात्मिकोत्थानस्य दिशि एका अविच्छिन्ना साधना।

श्रीमद्भगवद्गीतायाः षोडशाध्याये मनुष्याय अन्तःकरणे स्थितस्य दैव्यासुरीप्रवृत्तेः गहनविश्लेषण-माध्यमेन आत्मिकसंघर्षस्य वास्तविकानां स्वरूपाणि समुद्घाटयति। अध्यायोऽयं सुस्पष्टयति यत् मनुष्यः न केवलमात्रं बाह्यसामाजिकप्राणी अपितु अस्याभ्यन्तरे शक्तिद्वयं निरन्तरं सक्रियमस्ति। तत्रैकं मनुष्यं मोक्षं प्रति प्रेरयति किञ्चान्यत् बन्धनं पतनं वा प्रति गन्तुं प्रेरयति। श्रीकृष्णः अर्जुनं सम्बोधयन् आदौ दैवीगुणमुल्लिखति, यस्य संख्या षड्विंशतिः भवति। तद्यथा-

**अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।**
**दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥**
**अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।**
**दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्॥**
**तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।**
**भवन्ति सम्पदं दैवीमभिजातस्य भारत ।**[११]

अर्थात् अभयम्, सत्त्वसंशुद्धिः, ज्ञानयोगव्यवस्थितिः, दानम्, दमः, यज्ञः, स्वाध्यायः, तपः, आर्जवम्, अहिंसा, सत्यम्, अक्रोधः, त्यागः, शान्तिः, अपैशुनम्, दया, भूतेषु अलोलुप्त्वम्, मार्दवम्, ह्रीः, अचापलम्, तेजः, क्षमा, धृतिः, शौचम्, अद्रोहः, नातिमानिता चेति। एते गुणाः सर्वे आत्मशुद्धेः मोक्षस्य च मार्गस्य सहायकाः सन्ति। एवमपि आसुरीगुणविषये गीतायां सुस्पष्टमुच्यते-

**दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।**
**अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम्॥**[१२]

अर्थात् आसूरीगुणे दम्भदर्पाभिमान-क्रोध-पारुष्यज्ञानादयः षड्प्रमुखाः दोषाः सन्ति। ये आत्मानं रजस-तामस-प्रवृत्तिद्वयेन बध्नान्ति। गीतायाः अयमध्यायः केवलमात्रं दोषं गुणञ्च न गणयति किञ्चेयमेका सतर्कवाणी भवति यत् जीवनकुरुक्षेत्रे द्वन्द्वोऽयं सदा समुपस्थितोऽस्ति। भगवान् श्रीकृष्णः अस्याः प्रवृत्तेः फलस्वरूपं जन्मलाभकारीविचाराणामपि समुद्घाटयति। आसूरीव्यक्तिः यत् चिन्तयति-

---

११. श्रीमद्भगवदगीता- १६/१-३

१२. श्रीमद्भगवदगीता- १६/४

**इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् ।**
**इदमस्तीदमपि मे भविष्यति पुनर्धनम् ।।[१३]**

अर्थात् मयेदं प्राप्तम्, पुनश्च अग्रे प्राप्स्यामि, मया शत्रुः निहतः पुनश्च अग्रेऽपि हनिष्यामि, अहमेवेश्वरः, बलवान्, भोगी चाहमपि इति। एतादृशः अज्ञश्च अहं दान-यज्ञ-धर्मादिनां दर्शनं करोमि इति चिन्तया। एतादृश जनस्य साधनमपि दम्भेनाविधिपूर्वकम् अस्ति। एतादृश जनः मोहान्धकारविषयासक्तिषु बन्धनं प्राप्य अपवित्रवृत्तीनां वशवर्ती भवति। किञ्च नरकस्य मार्गं प्रति अग्रसरोऽस्ति।

अपरञ्च दैवीगुणसम्पन्नः साधकः विवेकपूर्वकं निर्णयं नयति, स्वाभ्यन्तरे दैवीगुणस्य जागरणं विधाय आसुरीवृत्तीनां विजयं च लभते। अयमेव गीतायां वर्णितः धर्मयुद्धोऽस्ति यः नैवास्ति कुरुक्षेत्रे, किञ्चात्मनः आभ्यन्तरे योद्धुं भवति। स्वामी-अडगडानन्द-महात्मागान्धीनामिव यथा विचारकैः गीतायुद्धः आन्तरिकसंघर्षः नाम्नाऽभि-हितोऽस्ति। यत्र शरीरमेव क्षेत्रमस्ति आत्माक्षेत्रज्ञश्च। यदा शरीराभ्यन्तरे दैवीगुणानां प्राधान्यं जायते तदैतत् धर्मक्षेत्रं जायते किञ्च यदा पुनः आसुरीवृत्तीनां प्राबल्यं वरीवर्तते तदा तु कुरुक्षेत्रं जायते।

मानवजीवनस्य कल्याणसाधनं भगवद्गीताग्रन्थस्य परमं चरमं च लक्ष्यम्। एतदर्थं भगवान् श्रीकृष्णः अर्जुनमुपदेशमाध्यमेन मोक्षलाभाय दिग्दर्शनं प्रददाति। वयं सर्वे अद्य जीवनयुद्धे अर्जुनस्येव किंकर्तव्यविमूढाः। अतः भगवद्गीतायाः वास्तविकं सन्देशं खल्वस्माकमुपास्यमस्ति। सर्वेऽपि साधकाः चेत् भगवद्युपदिष्टं गीतासन्देशमनुसृत्य स्वाभ्यन्तरस्य दैवी-मासुरीं च शक्तिं विज्ञाय विवेकपूर्वकं दैवीगुणमुपासन्ते तर्हि नूनमस्माकम् आत्मकल्याणं सम्भवेत्। अयमस्माकं कृते आध्यात्मिकयुद्धोऽस्ति। यद्यपि युद्धोऽयम् अदृश्यं तथापि वास्तविकम्। युद्धेऽस्मिन् यः एव विजयी भविष्यति असौ एव मोक्षस्याधिकारी नान्यः। वास्तविकदृष्ट्या श्रीमद्भगवद्गीतायां वर्णितः युद्धः न केवलमैतिहासिक अपितु आध्यात्मिकतायाः प्रतीकोऽस्ति। यदेव मनुष्याभ्यन्तरे सततं दैवी-आसुरी-प्रवृत्तीनां संघर्षस्य प्रतिनिधित्वमाध्यमेन प्रचलति। अयं युद्धः न बाह्यशस्त्रैः अपितु मानवानां हृदयाभ्यन्तरीण-कामादिभिः विकारै संघटितोऽस्ति। आधुनिकयुगे यदा बाह्यशान्तेः आवश्यकतया सह आन्तरिकस्थिरतायाः अपि सङ्कटः सततं समुदेति, तदा गीतायाः सन्देशोऽयं अतीव प्रासङ्गिकः भवति। ग्रन्थोऽयमेतदेव शिक्षयति यत् सन्मार्गेण युद्धस्तावत् आत्मविकासस्य, धर्मपालनस्य, मोक्षस्य च कृते मानवानां मार्गदर्शकोऽस्ति। अर्जुनस्य युद्धस्तावत् वास्तवदृष्ट्या आत्मसन्देहस्य, मोहस्य भ्रमस्य च विरुद्धे आसीत्। यत्र श्रीकृष्णः मार्गदर्शकरूपेण आत्मबोधस्य, कर्तव्यस्य च प्रकाशकः जातः। अतः गीतायाः युद्धस्तु शाश्वतः भवति यत् प्रतिजनेषु प्रतिदिनं संघटितं भवति। अस्मात् प्रकृतमोक्षकामीमानवस्य दैवीगुणं समाश्रित्य आसुरीवृत्तिं विजित्य च प्रत्यहं धर्मक्षेत्रं प्रत्यग्रसरः एव वास्तविकदृष्ट्या भगवद्गीतायाः मुख्यं कालातीतञ्च सन्देशमितिशम् ।

---

१३. श्रीमद्भगवदगीता-१६/४

**सन्दर्भग्रन्थसूची :-**

१. अडगडानन्दजी, स्वामी श्री यथार्थ गीता (हिन्दी), मुम्बई: श्री परमहंस स्वामी अडगडानन्दजी आश्रम ट्रस्ट, २०१७.

२. आत्मानन्द, स्वामी, गीतातत्त्व-चिन्तन, कोलकाता: अद्वैत आश्रम (प्रकाशन विभाग), २०१६.

३. गोस्वामी, प्रसाद दास, श्रीमद्भगवद्गीता, कोलकाता: सिमला स्ट्रीट, बङ्गाब्द १३२०.

४. दासगुप्त, श्रीसतीशचन्द्र, श्रीमद्भगवद्गीता: गांधीभाष्य अनुदित, कोलकाता: खादी प्रतिष्ठान,

५. देवशर्मा, विजयकृष्ण, उपनिषदरहस्य वा गीतार यौगिक व्याख्या, कोलकाता: श्रीगुरु मन्दिर, बङ्गाब्द १३३९.

६. मजुमदार, श्रीरामदयाल, गीता परिचय, कोलकाता: उत्सव कार्यालय, शकाब्द १८३५.

७. Murdoch, John- The Mahabharata, An English Abridgment: Introduction, Notes, and Review, London- Christian Literature Society for India, 1898

**-सहायकाध्यापकः, संस्कृतविभागः,**
**स्वर्णमयी-योगेन्द्रनाथ-महाविद्यालयः**
**पूर्वमेदिनीपुरम्, पश्चिमबङ्गः**

# विश्वगुणादर्शचम्प्वाः विश्वतोमुखत्वम्

-डॉ. टि. महेन्द्रः

(**शोधपत्रसारः** - साम्प्रतं वयं गूगलसाहाय्येन, वायुयानेन वा विश्वस्य विहङ्गवीक्षणं कर्तुं पारयामः। किन्तु १८ शताब्दीयेन कविना वेङ्कटाध्वरिणा तस्मिन् काले भारते विद्यमानानां नानातीर्थक्षेत्राणां नगराणां च भौतिकं स्वरूपं कीदृशमासीदिति विहङ्गवीक्षणेन विशदयता तत्तद्देशगतानां गुणदोषाणां विवेचनं कथमकारीति पत्रेऽस्मिन् विचार्यते)

'नानृषिः कुरुते काव्यमि'त्युक्तदिशा कविः काव्यनिर्माणे साक्षादृषिरेव। काव्यं कवेः नवनवोन्मेषप्रतिभया प्रसूतं सत् सर्वान् सहृदयानावर्जयति स्वीयालौकिकेन रसमाधुर्येण। वस्तुतः आजन्मतः एव दुःखत्रये निमग्नस्य मानवस्य दुःखापनोदनार्थं प्रेरणास्पदजीवनप्रदानार्थमेव च अपूर्वैः वर्णनैः साहित्यं सृज्यते कविभिः। अत एव प्रायः लोके महापुरुषत्वेन प्राप्तख्यातैर्मुक्तकण्ठेन इदमेव भण्यते यत् स्वस्य प्रशस्तजीवनस्य प्रेरणास्रोतः उत्तमसाहित्यमेवेति। वस्तुतः कस्यापि विषयस्य याथातथ्येन वर्णनं भवति इतिहासः। किन्तु काव्यं कथनीयस्य विषयस्य विन्यासविशेषेण लोकोत्तरवर्णनोपेतं सत् पाठकान् सम्मोहयति, चेतसि आनन्दं जनयति, कर्तव्ये कर्मणि प्रचोदयति च। तदुक्तं च केनचिदाचार्येण-

**यानेव शब्दान् वयमालपामः यानेव चार्थान् वयमुल्लिखामः।**
**तैरेव विन्यासविशेषभव्यैस्सम्मोहयन्तो कवयो जयन्ति॥**

अत एव 'अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा प्रतिभे'ति' निरुक्तम् आचार्याभिनवगुप्तपादेन लोचनटीकायाम्। तादृशापूर्वनिर्माणफलरूपं काव्यम् इन्द्रियग्राहकतादृशा दृश्यं श्रव्यमिति द्विधा व्यभज्यत अस्मदाचार्यैः। तत्र चम्पूकाव्यमपि श्रव्यकाव्येष्वन्यतमत्वेन विलसति। तत्र **गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते**(सा.द.६.३३६) इति चम्पूकाव्यस्य सामान्यलक्षणं सुप्रसिद्धमेव साहित्यजगति। अनेन गद्यपद्ययोः मिश्रणमेव चम्पूकाव्यमिति स्फुटम्। वस्तुतः चम्पूकाव्यस्य रचना काचित् विशिष्टा एव। यतो हि संस्कृते पद्यकाव्यानामेव आधिक्यं दरीदृश्यते। तत्र पद्यकाव्यानि छन्दोबद्धानि सन्ति रागादिना सहृदयान् आवर्जयन्ति। तन्निर्माणे च कविना महान् श्रमः विधेयो भवति। तथैव, पद्यरचनापेक्षया गद्यरचना अतीव कष्टतरा भवति। अत एव लोके अङ्गुलिगणनीयानि एव सन्ति गद्यकाव्यानि। यतो हि गद्यरचनायां वर्णनीयवस्तुनः विशेषसूक्ष्मेक्षिकादृष्टिः नितान्तमपेक्षिता भवति तन्निर्मातुः कृते। तत्र **गद्यं कवीनां निकषं वदन्ति** इत्याभाणकमपि तमभिप्रायं द्रढयति। अतस्तयोः मिश्रितरूपस्य चम्पूकाव्यस्य प्रणयने कवेः कृते तदुभयविधम् असाधारणदक्षत्वं नितरामेव अपेक्षितमिति कथने नास्ति लेशोऽपि संशयस्य।

**चम्पूकाव्यलक्षणेऽस्फुटता**

तादृशविशिष्टस्य चम्पूकाव्यस्य लक्षणं परिशीलयामः चेत् संस्कृतकाव्यशास्त्रे सत्स्वपि अनेकेषु काव्यशास्त्राचार्येषु दण्डि-विश्वनाथ-हेमचन्द्र-विद्यानाथाचार्यैरेव अस्य चर्चा कृतेति संलक्ष्यते। एतदतिरिच्य त्रिविक्रमभट्ट-वेङ्कटाध्वरिप्रभृतिभिः कैश्चित्कविभिरपि चम्पूकाव्यस्य प्रशंसाक्रमे तद्विमर्शः कृतो दृश्यते। किन्त्वेतेषां सर्वेषाम् आचार्याणां लक्षणानि निरुक्तानि वा निशिततया परिशीलयामश्चेत् एतानि सर्वाण्यपि

लक्षणानि केवलं चम्पूकाव्यस्य बहिरङ्गस्य स्पर्शमेव अकुर्वन्निति वक्तुं शक्यते। वस्तुतः अद्यावधि केनापि आचार्येण चम्पूकाव्यस्य समग्रलक्षणं न कृतमित्येव वक्तुं शक्यते। तत्र **गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते** (काव्यादर्शः १.१९) इतीदम्प्रथमतया चम्पूकाव्यलक्षणं दण्ड्याचार्यो वा **गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते** इति कथयन्तः विश्वनाथ-विद्यानाथाचार्यादयोऽपि तस्य काव्यस्य बाह्यस्पर्शमेव अकुर्वन्। तथैव **गद्यपद्यमयी साङ्का सोच्छ्वासा चम्पूः** (काव्यानु. पृ ४०८) इति लक्षणं कुर्वन् काव्यानुशासनकारः हेमचन्द्राचार्योऽपि चम्पूकाव्यस्य केवलम् अध्यायविभागविषये एव चर्चामकरोत्, न तु तत्स्वरूपविषये। एतल्लक्षणमपि पूर्णतया न सङ्गच्छते चम्पूकाव्यालोके। यतो हि सर्वेष्वपि चम्पूग्रन्थेषु अङ्कोच्छ्वासादिविभागः नैव दृश्यते। वस्तुतः एतेषु सर्वेष्वपि लक्षणेषु कानि तत्त्वानि चम्पूकाव्ये भवेयुरितिविषये नास्ति काचित् स्फुटता अद्यापि। यदि गद्यपद्ययोः मिश्रणमेव चम्पूकाव्यमिति वयं भावयामश्चेत् तत्तु वेदेषु रूपकेषु च संलक्ष्यते एव। अनेन वेदोऽपि कश्चन चम्पूग्रन्थः इति वक्तव्यं भवति। वस्तुतः लक्षणं नाम अतिव्याप्त्यव्याप्त्यादिदोषरहितं स्यात्। किन्त्वत्र तथा नैव संलक्ष्यते यथा अपेक्षितम्। अतः अद्यापि चम्पूकाव्यलक्षणमस्फुटमेव वरीवर्तीति वक्तुं शक्यते।

तत्र चम्पूकाव्यस्य वैशिष्ट्यं विवृण्वता वेङ्कटाध्वरिकविवरेण विश्वगुणादर्शचम्पूकाव्ये प्रोक्तं यत्-

**पद्यं यद्यपि विद्यते बहु सतां हृद्यं विगद्यं न तद्-**
**गद्यं च प्रतिपद्यते न विजहत्पद्यं बुधास्वाद्यताम्।**
**आदत्ते हि तयोः प्रयोग उभयोरामोदभूमोदयं**
**सङ्गः कस्य हि न स्वदेत मनसे माध्वीकमृद्वीकयोः॥ (१.५)**

अनेन अवगम्यते यत् लोके गद्यरहितं पद्यं, पद्यरहितं गद्यं वा बुधजनास्वादयोग्यं न प्रतिपद्यते, अतस्तदुभयविधं सौन्दर्यसम्पूरकं सर्वजनामोदकं माध्वीकमृद्वीकरसनिष्यन्दकं चम्पूकाव्यं मया विरच्यत इति कविरवोचत्। अनेन कवेः काले विद्यमानस्य चम्पूकाव्यस्य गरीयस्त्वं प्रस्फुटति।

अथ च नलचम्प्वादि-चम्पूप्रबन्धेभ्यः अस्मिन् ग्रन्थे स्वीयालौकिकवर्णनया पात्रद्वयस्य विहङ्गयात्रामाध्यमेनैव विश्वे विद्यमानगुणानां संकीर्तनं विहितं संदृश्यते। अतः अस्य काव्यस्य वैशिष्ट्यं नितरां संदृश्यते विद्वल्लोके।

**कवेः कृतित्वं व्यक्तित्वञ्च**

चम्पूकाव्यस्यास्य प्रणेतुः कविवरस्य वेङ्कटाध्वरिणः जन्म तमिलदेशे काञ्चीक्षेत्रे अरशाणिपालग्रामे श्रीवैष्णवकुले समजायत इति स्वयमेव प्राकटयत्-

**काञ्चीमण्डलमण्डनस्य मखिनः कर्नाटभूभृद्गुरो-**
**स्ताताचार्यदिगन्तकान्तयशसो यं भागिनेयं विदुः।**
**अस्तोकाध्वरकर्तुरप्ययगुरोरस्यैष विद्वन्मणेः**
**पुत्रः श्रीरघुनाथदीक्षितकविः पूर्णो गुणैरेधते॥ (१.२)**

कविवरोऽयम् अप्पय्यदीक्षितस्य प्रपौत्रः, विविधशास्त्रपारङ्गतस्य रघुनाथदीक्षितस्य पुत्रः। किन्तु अयमप्पय्य-दीक्षितः प्रसिद्धकाव्यशास्त्रकारात् अप्पय्यदीक्षितात् भिन्नः इति ज्ञायते। कविना ग्रन्थे 'हूणाः करुणाहीनाः' प्रयुक्तहूणादिशब्दैः अस्य कालः १७ शताब्दी इति संज्ञायते। अनेन उत्तरचरितचम्पूः, नीलकण्ठविजयचम्पूः,

वरदाभ्युदयचम्पूः, यादवराघवीयं, लक्ष्मीसहस्रम् इत्येते पञ्चाधिकाः ग्रन्थाः संदृब्धाः।

**कथावस्तुनः वैशिष्ट्यम्**

ग्रन्थेऽस्मिन् कृशानु-विश्वावसुनामकाभ्यां द्वाभ्यां गन्धर्वाभ्यां विश्वविहङ्गवीक्षणेच्छया कृतायाः यात्रायाः वर्णनं संदृश्यते-

**विश्वावलोकनस्पृहया कदाचिद्विमानमारुह्य समानवेषम्।**
**कृशानुविश्वावसुनामधेयं गन्धर्वयुग्मं गगने चचार॥ (५)**

अत्र गुणैकपक्षपातिना विश्वावसुना आदौ सर्वस्मिन्नपि वस्तुनि गुणः एव विलोक्यते। किन्तु दोषैकदृष्टिना कृशानुना तु सर्वस्मिन्नपि वस्तुनि दोषः एव अवलोक्यते।

**कृशानुरकृशासूयः पुरोभागिपदं गतः।**
**विश्वावसुरभूद्विश्वगुणग्रहणकौतुकी॥ (६)**

तत्र पुरोभागी नाम दोषैकदृक् इत्यर्थः। **दोषैकदृक् पुरोभागी** इत्यमरः (३.१.९४) इत्थं तयोः खण्डनमण्डनैः अयं ग्रन्थः राराज्यते। इदं च खण्डनमण्डनं न केवलं दोषाविष्कारोद्देशपरमपि तु तस्य वस्तुनः दार्ढ्यार्थमेव कृतमिति कविना प्रोक्तं ग्रन्थान्ते। इत्थमयं ग्रन्थः लोके दूषितमनसा गुणानपि दोषत्वेन अवलोकयितॄणां जनानां कृते, लोलुपेन स्वार्थैकसाधनतत्परेण च मनसा दोषानपि गुणत्वेन दर्शिनां जनानां कृते च नेत्रोन्मीलनकरः वरीवर्ति। वस्तुतः मानवः स्वार्थैकजीवी। अतः सः स्वार्थस्य सिद्ध्यर्थं पक्षपातगुणमनुसरति। पक्षपातो नाम दोषे गुणारोपः गुणे च दोषारोपः। अनेन ग्रन्थमाध्यमेन कविः इदं स्पष्टीकर्तुं प्रायतत यत्

**शत्रोरपि गुणाः वाच्याः दोषा वाच्याः गुरोरपि।**
**पक्षपाताद्भवेत्पापं दोषाः दोषाः गुणाः गुणाः।** इति

अस्मिन् ग्रन्थे ५३ विषयाणां वर्णनं ५७६ पद्यैः विहितं वर्तते। तत्र कविवरेण सूर्यलोक-भूलोकयोः, भूलोके च बदरीक्षेत्र-अयोध्या-गङ्गानदी-काशी-समुद्र-जगन्नाथक्षेत्र-गुर्जरदेश-यमुनानदी-महाराष्ट्र-आन्ध्र-कर्णाटक-वेङ्कटगिरि-घटिकाचल-दीक्षारण्य-रामानुज-चन्नपट्टण(मद्रास)-काञ्ची-श्रीमद्वेदान्तदेशिकाचार्य-कामाक्षीदेवी-एकाम्रेश्वर-क्षीरनदी-वाहानदी-कावेरी-रङ्गनगरी-जम्बूकेश्वर-चोलदेश-शार्ङ्गपाणि-राजगोपाल-सेतु-ताम्रपर्णी-शठकोपमुनि-वेदान्ति-ज्योतिषिक-भिषक्कवि-तार्किक-मीमांसक-वैयाकरण-वैदिक-राजसेवक-दिव्यक्षेत्र-प्रभृतीनां वर्णनं सुनिपुणं कृतमस्ति।

ईदृशविशिष्टरूपवर्णनेन कवौ विद्यमाननानाविधपाण्डित्यस्य प्रकर्षः एव निदानमिति वक्तुं शक्यते।

**पात्रचित्रणम्**

अस्मिन् चम्पूकाव्ये कविवरेण द्वाभ्यामेव कृशानु-विश्वावसुपात्राभ्यां समग्रकथायाः वर्णनमकारि। संवादरूपेण प्रणीतेऽस्मिन् ग्रन्थे, लोके अस्माभिः नित्यं दृश्यमानवस्तुषु विद्यमानगुणदोषयोः विवेचनं कृतं दृश्यते। लोके प्रायः प्रत्येकं व्यक्तिः यत्किमपि वस्तु एकया एव भावनया अवलोकयति। किन्त्वत्र प्रत्येकं वस्तुनः गुणदोषाख्योभयविधपक्षयोः विमर्शः विहितः। तत्र समग्रे प्रबन्धे कृशानुपात्रद्वारेण कविः लोके तावत् प्रसिद्धां -

**खलः सर्षपमात्राणि परच्छिद्राणि पश्यति।**
**आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति॥**

इति दोषदर्शनैकपरम्परां न्यरूपयत्। विश्वावसुस्तावत्-

**गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवेश्वरः।**
**शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति॥**

इतीव केवलं गुणैकदर्शनं करोति। कृशानुस्तावत् विश्वावसुना गोचरिते प्रत्येकं वस्तुनि दोषपक्षस्योन्मीलनं विहितं संदृश्यते। तत्र लोकवन्द्यस्य दिनकरस्य प्रशंसा विश्वावसुना कृते सति, कृशानुस्तावत् तं जगद्वन्द्यं निन्दति-

**पान्थान् दीनानहह वसुमानातपान्थान् विधत्ते**
**शुष्कां पृथ्वीं रचयतितरां शोषयत्योषधीश्च।**
**कासाराणां हरति विभवं क्लान्तिशान्तिप्रदानं**
**क्रूरस्यैवं गुणलवकथा का? स्वतो भास्वतोऽस्य॥ ( ८ )**

तदा विश्वावसुः उत्तरति-

**वृष्टिं घृष्टिभिरारचय्य जगतस्तुष्टिं सरीसर्ष्टि यः**
**पुष्टिं द्राग् विशिनष्टि दृष्टिषु नृणां ध्वान्तं पिनष्टि स्थिरम्।**
**प्राज्ञानामपवर्गमार्गदममुं पद्मागृहोल्लासिनां**
**को न स्तौति समस्तलोकसुहृदं द्योभूषणं पूषणम्॥ ( ९ )**

अत्र कविना जगद्वन्द्यस्य सूर्यस्य प्रशंसा यथाखण्डनं विहिता। अत्र कविः कस्यापि विषयस्य वा निन्दनं यथालोकं विधाय पुनः स्वस्य प्रतिभया तस्य माहात्म्यं समुद्घाटयति।

इत्थं कविः द्वाभ्यामेव पात्राभ्यां मानवहृदयान्तराले निहितयोः निसर्गयोः गुणदोषयोः वर्णनं सुचारुरूपेण अवर्णयत्। अनेन वर्णनेन कविः समाजे दोषेष्वपि गुणदर्शनं कथं करणीयमिति उदात्तभावनां अस्मासु उद्भावयति।

**कवेः प्रातिभम्**

कवित्वबीजरूपसंस्कारवान् कविः स्वीयालौकिकप्रातिभशक्त्या नवनवोन्मेषं विरचयति। तादृशप्रतिभावन्तः चम्पूकाव्यलोके त्रिविक्रमभट्टादयः द्वित्राः एव विलसन्ति। तेष्वन्यतमः भवति वेङ्कटाध्वरिः। अनेन कविवरेण ग्रन्थेऽस्मिन् यावन्तः भौगोलिकाः प्रदेशाः विषयाः वा समुपवर्णिताः तावत्केनापि न कृतमेवेति कथने नास्त्यतिशयोक्तिः। अनेन ग्रन्थेन कविवरः सर्वेषु अपि वस्तुषु अस्माभिः गुणः अवलोकनीयः देशाटनं च करणीयमिति उपदिशति। तदुक्तं च-

**देशाटनं पण्डितमित्रता च वाराङ्गना राजसभाप्रवेशः।**
**अनेकशास्त्रार्थविलोकनं च चातुर्यमूलानि भवन्ति पञ्च॥** इति।

अनेन काव्याध्ययनेन द्वाभ्यां गन्धर्वाभ्यां कृता यात्रा अस्माभिरपि कर्तव्या इति जिज्ञासा समुदेति।

तत्र कविवरः आदौ भूलोकं प्रशंसति विश्वावसुमुखेन-

**स्वर्गौकोभिरदोनिवासिपुरुषारब्धातिशुद्धाध्वर-**
**स्वाहाकार-वषट्क्रियोत्थममृतं स्वादीय आदीयते।**
**आम्नायप्रवणैरलङ्कृतिजुषेऽमुष्यै मनुष्यैः शुभै-**
**र्दिव्यक्षेत्रसरित्पवित्रवपुषे देव्यै पृथिव्यै नमः॥ ( २५ )**

किन्तु कृशानुः निन्दति यत्-

**जननमरणक्वाधिव्याधिप्रभेदशुभेतरा-**
**कलनमलिना लोकाः शोकातुराश्च भुवं गताः।**
**तदिह मदिभिः क्षुद्रैश्छिद्रैकमार्गणतत्परैः**
**प्रभुभिरुदितक्षत्यै क्षित्यै बुधः स्पृहयेत कः?॥ ( २३ )**

तर्हि अस्य समाधानरूपेण रामकृष्णादि-भगवदवताराणां मान्धातृ-भगीरथादि-प्रशस्तनृपाणां च जन्म अस्मिन्नेव महति भूमण्डले अभूदिति प्रत्युत्तरं प्रादात्। तदनु भूलोके सर्वादौ प्रसिद्धं पुण्यक्षेत्रं बदरिकाश्रमं वर्णयति-

**इदं बदरिकाश्रमस्थलमिहैष नारायण-**
**स्तपस्यति नमस्यतां स्थिरतमं तमः शोषयन्।**
**विकासिधिषणोन्मिषद्विषयवर्जनाः सज्जना**
**जनार्दनमहर्दिवं भुजगमञ्चमर्च्चन्त्यमी॥ ( २९ )**

इति विश्वावसुना बदरिकाश्रमस्य प्रशंसायां कृतायां सत्यां दोषैकद्रष्टा कृशानुः तं दिव्यक्षेत्रं विनिन्दति-

**यदत्र जागर्ति शिलासमं हिमं सुशीतला गन्धवहाश्च दुःखसहाः।**
**जलावगाहाच्चकितो जनस्ततः कुतस्त्वनुष्ठास्यति कर्म निर्मलम्॥ ( ३० )**

तर्हि तस्य समाधानरूपेण

**परमहिमयुतत्वात् प्राप्तवैकुण्ठसाम्यं**
**पदमिदमुपयान्तः पण्डिताः शान्तिमन्तः।**
**मुहुरिह समयेषु स्नानहेतोः सरोगा-**
**स्तदपि भृशमरोगास्तार्क्ष्यहेतोः प्रसादात्॥ ( ३५ )**

इति तस्य क्षेत्रस्य माहात्म्यं समुद्घोषयति। तथैव यमुनानदीवर्णनप्रसङ्गे कृशानुना श्रीकृष्णस्य चौर्यकर्मणः निन्दा कृता। तस्य समर्थनं विश्वावसुना इत्थं समाधत्तम्-

**चोरस्य चौर्यं जगति प्रतीतं**
**चौर्यस्य चौर्यं न तु दृष्टपूर्वम्।**
**चौर्याद्यकार्याणि बत श्रुतानि**
**कृष्णस्य मुष्णन्तितमां तमांसि॥ ( १२८ )**

तत्र कवेः हृद्या न्यायशास्त्रनिरुक्तिः यथा -

**मोहं रुणद्धि विमलीकुरुते च बुद्धिं**
**सूते च संस्कृतपदव्यवहारशक्तिम्।**
**शास्त्रान्तराभ्यासनयोग्यतया युनक्ति**
**तर्कश्रमो न तनुते किमिहोपकारम्॥ ( ५५६ )**

व्याकरणशास्त्रस्य च-

**झोऽन्तः शश्छोटि शेषो घ्यसखिससजुषोरुर्विरामोऽवसानम्**
**छे चेति व्यर्थवाचः सदसि यदि सतां शाब्दिकाश्चेद् बुधाः स्युः ।**
**किं तैरेवापराद्धं नट-विट-गणिकानृत्यहस्तप्रचारै-**
**स्तोधी तोधी तधीति त्तकिट तकिट धिक् ताहधिक् तत्तकारैः** (५६९)

इत्थं प्रबन्धेऽस्मिन् कविना वेदप्रभृतिभौगोलिकज्ञानपर्यन्तानां बहूनां विषयाणां निरूपणं विहङ्गवीक्षणेन गुणदोषप्रदर्शनपूर्वकं कृतम् अपूर्ववर्णनं प्रायः संस्कृतवाङ्मये अनितरकविसाध्यमित्येव वक्तुं शक्यते। एतेन प्राचीनकवीनां मनीषा कीदृशी आसीदिति ऊहितुं शक्यते।

कविना विहङ्गवीक्षणेन वर्णितानां प्रदेशानां सूची




- बदरीक्षेत्रम्
- अयोध्या
- गङ्गानदी
- काशी
- जगन्नाथक्षेत्रम्
- गुर्जरदेशः
- यमुनानदी
- महाराष्ट्रम्
- आन्ध्रदेशः
- कर्णाटकम्
- चन्नपट्टणम् ( मद्रास् )
- काञ्ची-
- कावेरी
- रङ्गनगरी

## उपयुक्तग्रन्थसूची


- विश्वगुणादर्शचम्पूः - वेङ्कटाध्वरी, वाणीविलासमुद्रणालयः, मैसूरु १८८६.
- विश्वगुणादर्शचम्पूः - वेङ्कटाध्वरी, निर्णयसागरमुद्रणालयः, बाम्बे १८९९.
- A.B. Keith, A History of Sanskrit Literature , Oxford University Press, London, , 1941.
- D.D. Kosambi, Introduction to Sanskrit Literature , Popular Prakashan, Bombay. 1957.
- G.H. Bhatt , The Development of Sanskrit Kavya Literature , Oriental Institute, Baroda. 1964 .
- M. Krishnamachariar, History of Classical Sanskrit Literature , Tirumala-Tirupati Devasthanams Press, Madras. 1937.
- P.V. Kane. History of Sanskrit Poetics , Bhandarkar Oriental Research Institute, Poona, 1951.
- V.Raghavan, sanskrit poetics, The Adyer Library and Research Centre,Madras,1970



-सहाचार्यः
संस्कृतप्राच्यविद्याध्ययनसंस्थानम्,
जवाहरलालनेहरूविश्वविद्यालयः,
नवदेहली

# ॥ स्वप्नोऽपि कश्चन आरम्भः॥

– डॉ. आशीषः कुमारः *

**सा स्त्री पुनः पुनः पलायते।**
**प्रत्यहं प्रतिरात्रं च एकमेव स्वप्नं पश्यति,**
**यतः मोक्षेच्छां न विस्मरेत्।**
**मुक्तिः न लभ्येत चेदपि,**
**तिष्ठेत् मुक्तिस्वप्नः।**
**जीवनं न परिवर्तते चेदपि,**
**परिवर्तनयत्नस्तु जीवितः तिष्ठेत्।**

कवेः अरुणकमलस्य 'स्वप्न' इति कविता प्रसिद्धा। एषा कविता स्त्रीणां मुक्तिप्रश्नेन गभीरतया संबद्धा अस्ति। अस्यां कवितायां काचित् स्त्री ताडिताभूय पुनः पुनः श्वशुरालयात् पलायते। कदाचित् कस्यचित् मन्दिरस्य सोपानेषु बहूनि क्षणानि यापयति। पुनः, तमसि जाते तदेव स्थलं प्रतिनिवर्तते। कदाचित् कस्यचिद् दूरस्थस्य बान्धवस्य परिचितस्य वा गृहे द्वित्रदिनानि यापयति। कदाचित् स्वकीयं पितृगृहं प्रति गच्छति। परञ्च सप्ताहस्य मासस्य वा अनन्तरं क्लान्ता सा तदेव स्थलं प्रतिनिवर्तते। एवं तस्याः प्रतिनिवर्तनम् अनिवार्यमेव इति कथनं समीचीनतरं स्यात्। एतत् तस्याः विवशता। एतदपि स्मर्तव्यम् यत् सा पलायनात् पूर्वं ताड्यते, प्रतिनिवृत्ता अपि ताड्यते। किं सा तस्याः दुःखजन्यां नियतिं न जानाति?

कव्यानुसारं सा सम्यक् जानाति यत् ताडनां प्राप्य सा यतः पलायते, पुनः पुनः तया तत्रैव प्रतिनिवर्तितव्यम्। सममेव प्रतिनिवृत्ता पुनः ताडयिष्यते इति जानाति सा।

**सा जानाति स्म यन्नास्ति कश्चन अन्यः मार्गः,**
**नास्ति क्वापि अन्यः कश्चन आश्रयः**
**सा जानाति स्म यत् प्रतिनिवर्तितव्यमेव पुनरपि।**

तथापि सा पलायते। तस्या गृहाद् गङ्गा अपि नास्ति अतिदूरे। रेलमार्गोऽपि समीपस्थः। किन्तु सा स्वदुःखं जानन्ति अपि, यत् तया पुनः प्रतिनिवर्तयितव्यं, सा पुनः ताडयिष्यते च, तथापि पलायते। यद्यपि स्वल्पकालाय एव। सा मृत्योः वरणं न करोति। न आत्मघातिमार्गम् अङ्गीकरोति। अतः गङ्गायाः सन्निकर्षः, रेलमार्गस्य निकटता वा तस्यै न विकल्पेते। ताडनाद् रक्षणाय जीवनत्यागस्तस्यै न रोचते। यतो हि सा पुनः पुनः 'जीवनात् मृत्यवे न अपि तु मृत्योः जीवनाय पलायते।' यद्यपि सा पलायते तथापि,

**"सा केनचित् बन्धनस्तम्भेन बद्धा गोवत्सिका इव पलायते, यावत् रज्जुः गच्छति, तावत् धावति। ग्रीवाभङ्गं यावत् बन्धनस्तम्भं कम्पयति।''**

---

**मूललेखकः**– डॉ. राजीवरञ्जनः गिरिः, सहाचार्यः, हिन्दी विभागः, दिल्ली विश्वविद्यालयः, देहली
**संस्कृतानुवादकः**– डॉ. आशीषः कुमारः

अन्ततः कोऽयं बन्धनस्तम्भः, येन सा बद्धा? यम् उत्पाटयितुं सा पुनः पुनः निष्फलं यत्नं करोति? अवधेयं यत् ग्रीवाभङ्गपर्यन्तं यत्नं करोति। यद्यपि तम् उत्पाटयितुं न शक्नोति, किन्तु कम्पयति। ग्रीवाभङ्गपर्यन्तं यत्नः अर्थवान् अस्ति। शनैः शनैः बन्धनस्तम्भं मूलतः उत्पाटयितुं न शक्नोति चेदपि, भग्नः भविष्यतीति निश्चितम्। यतः सा स्त्री प्रतिरात्रं स्वप्नं पश्यति, यतः मोक्षेच्छां न विस्मरेत्। स्वप्नोऽस्ति–

**"मुक्तिः न लभ्येत चेदपि, तिष्ठेत् मुक्तिस्वप्नः।**
**जीवनं न परिवर्तते चेदपि, परिवर्तनयत्नस्तु जीवितः तिष्ठेत्।"**

अस्यां कवितायां यस्मात् स्थानात् सा स्त्री ताडिताभूय पलायते, तत्रैव सा पुनः पुनः प्रतिनिवर्तते ताड्यते च। एतत् स्थानं तस्याः श्वशुरालयः। तदर्थं कविना अरुणकमलेन "गृहम्" "कुटुम्बम्" वेति शब्दौ न प्रयुक्तौ। किमेतद् अनायासम्? यद्यपि विवाहानन्तरं सामाजिकसंरचनायाम् एतदेव तस्याः 'गृहं' 'कुटुम्बं' वा वर्तते। अस्यां कवितायां 'गृहम्' इति शब्दः केवलम् एकवारं प्रयुक्तः। यत्र सा द्वित्रदिनानि यापयति–

**कस्यचिद् दूरस्थबान्धवस्य परिचितस्य वा गृहे**

स्पष्टमस्ति, अत्रापि सा जीवनस्य द्वित्रदिनानि केवलं यापयति, जीवति न। कदाचित् पलाय्य पितृगृहं गच्छति। तत्र सप्ताहं मासं वा वसति, ततोऽपि क्लान्ता प्रतिनिवर्तते। तात्पर्यमिदं यत् पितृगृहेऽपि जीवनस्य कतिपयदिनानि यापयति। "क्लान्ता प्रतिनिवर्तते" इति वाक्यं द्विधा संकेतयति :–

**१. जीवनं न जीवितं, केवलं विवशतया यापितम्।**

**२. विद्यमानसंरचनायां पितृगृहं तस्यै विकल्पत्वेन नास्ति।**

अपरिहार्यमिदं यत्तस्यै श्वशुरालय एव निर्वहणीयम्। अस्यां समाजिकसंरचनायां मन्यते यत् "शिविका पितृगृहात् नीयते चेत्, मृतशरीरं श्वशुरालयात् एव नीयते।" एवं स्थितौ स श्वशुरालयः यत्र सा ताड्यते, किमसौ सत्यार्थे 'गृहम्' अथवा 'कुटुम्बम्' इति वक्तुं शक्यते? कदापि न। स केवलं तस्यै 'स्थानमात्रम्' अस्ति। गृहं न केवलं छदिसमाश्रयमात्रम्; नैव च कुटुम्बमपि कतिपयजनानां सहवासमात्रम् अस्ति। यावत् परस्परसंवेदनात्मकसंबन्धः तथा च तज्जन्या ऊष्मा न विद्येते, तावत् न "गृहम्" न "कुटुम्बम्" इति सम्बोधयितुं शक्यते। अन्ततः किमर्थं सा तत्र वसति? सा कस्य बन्धनस्तम्भस्य दृढया रज्ज्वा बद्धास्ति? यम् उत्पाटयितुं भङ्क्तुं वा सा ग्रीवाभङ्गपर्यन्तं सातत्येन यत्नं करोति। स बन्धनस्तम्भः पितृसत्तात्मकव्यवस्थारूपम् अस्ति। स्मर्तव्यं यत् पितृसत्ता इति उक्ते कुटुम्बे पुरुषस्य केवलं प्रधानपुरुषत्वेन नास्ति। एवं स्यात् चेत्, एष बन्धनस्तम्भः बहुपूर्वम् उत्पाटितः अभविष्यत्। अथवा अस्य रज्जुः भग्ना अभविष्यत्। किमिदं कथनम् आवश्यकं यत् संरचनेयं धूर्ततया कूटनयेन च विहितास्ति। अद्यापि तथैव। आर्थिकैः, धार्मिकैः, राजकीयैः, वैधानिकैः, सांस्कृतिकव्यवस्थाभिः मूल्यैः मर्यादाभिः, संस्कारैः, आदर्शैः, चिन्तनस्य विविधरूपैः, विचारधाराभिः निर्मितिभिः एवं च विविधगतिविधिभिः इयं संरचना सूक्ष्मरीत्या संरचिता। एतेषां सर्वेषां माध्यमेन पितृसत्ता पुरुषं स्त्रियाः अपेक्षया श्रेष्ठत्वेन स्थापयितुं मिथ्या प्रपञ्चं रचयति प्रचारयति च।

अस्यां कवितायां स्त्रियाः समीपे न मार्गः कश्चन, न च अन्त्यं शरण्यम्। तस्मात्, तया स्वयमेव मार्गः निर्मातव्यः अपि च स्वयमेव निजाश्रयः निर्मातव्यः इति बोधः वर्तते अस्याः स्त्रियाः। अयं बोधः एवं च गहनजिजीविषा ताङ्गगायां निपतनात्, रेलपथेन वा आत्मवधात् तां निवारयति। अतः श्वशुरालये ताडनां प्राप्य